अवी, स्त्री, (अवत्यात्मानं लज्जया । अव + ई ।) ऋतुमती । इति हेमचन्द्रः ॥

अवीचिः, पुं, (नास्ति वीचिः प्रकाशः सुखं वा यत्र।) नरकविशेषः । इति शब्दरत्नावली ॥
("अवीचिमन्धतामिस्रं कुम्भीपाकं तथैव च ।
असिपत्रवनञ्चैव तापनञ्चैव विंशकम्" ॥
इति याज्ञवल्क्यः ॥) वाच्यलिङ्गस्तु तरङ्गशून्ये ।

अवीचिः, पुं, (नास्ति वीचिः सुखं यस्मिन्)
अवीचिमत्, क्ली, (अवीचि + मतुप् ।) } नरकविशेषः। यथा। "वैतरणी पूयोदः प्राणरोधो विशसनं लालाभक्षः सारमेयादनमवीचिरयःपानमिति । य स्त्विह वा अनृतं वदति साक्ष्ये द्रव्यविनिमये दाने वा कथञ्चित् स वै प्रेत्य नरके अवीचिमत्यधःशिरा निरवकाशे योजनशतोच्छ्रायात् गिरिमूर्द्ध्नः संपात्यते। यत्र जलमिव स्थलमश्मपृष्ठमभासते तदवीचिमत् तिलशो विशीर्य्यमाणशरीरो न म्रियमाणः पुनरारोपितो निपतति"। इति श्रीभागवते५ स्कन्धे२६अध्यायः॥

अवीचिमयः, पुं, (अवीचि + मयट् ।) नरकभेदः । "यः साक्ष्यादौ अनृतं वदति स निरवलम्बेऽवीचिमये अधःशिरा निपात्यते यत्र" । इति श्रीभागवते ॥

अवीरः, त्रि, (नास्ति वीरो यस्य।) सत्वरहितः । निर्व्वीर्य्यः । इति मेदिनी ॥

अवीरा, स्त्री, (नास्ति वीरः पुत्रादिर्यस्याः ।) अजातापत्यविधवा । इति स्मृतिः । निष्पतिसुता । इत्यमरमेदिन्यौ ॥ तदन्नभोजने दोषप्रायश्चित्ते यथा,—
"यो विप्रोऽवीरान्नभोजी ऋतुस्नातान्नभोजकः ।
मसीजीवी वार्द्धुषिको विषहीनो यथोरगः" ॥
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २१ अध्यायः ॥ * ॥
अपि च ।
"अवीरान्नञ्च यो भुङ्क्ते योनिजीवी च ब्राह्मणः ।
यस्त्रिसन्ध्याविहीनश्च स गोहत्यां लभेत् ध्रुवं" ॥
इति च तत्रैव २७ अध्यायः ॥ * ॥ विष्णुः । गणगणिकास्तेनगायनकान्नानि भुक्त्वा सप्तरात्रं पयसा वर्त्तेत । अवीरास्त्रीस्वर्णकारसंसर्गपतितानाञ्च । इति प्रायश्चित्तविवेकः ॥ * ॥ सामान्येनाभोज्यान्नभोजनप्रकरणे मनुः,— [इत्यादि ।
"नाश्रोत्रियकृते यज्ञे ग्रामयाजिकृते तथा" ।
"अनर्च्चितं वृथामांसमवीरायाश्च योषितः"
इत्यादिकञ्चोपक्रम्य ।
"भुक्त्वा चान्यतमस्यान्नममत्या क्षपणं त्र्यहं" ।
"मत्या भुक्त्वा चरेत् कृच्छ्रं रेतो विण्मूत्रमेव" ॥
इति । अवीरा पतिपुत्रविहीना निःसम्बन्धिनी । ससम्बन्धिन्यास्तु श्राद्धादिनाभ्यनुज्ञानात् व्यवहारात् धनाधिकाराच्च । इति च प्रायश्चित्तविवेकः ॥ * ॥ अस्या धनाधिकारो यथा याज्ञवल्क्यः,—
"पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ।
तत्सुतो गोत्रजो बन्धुः शिष्याः सब्रह्मचारिणः ॥
एषामभावे पूर्ब्बस्य धनभागुत्तरोत्तरः ।
स्वर्य्यातस्य ह्यपुत्त्रस्य सर्ब्बवर्णेष्वयं विधिः" ॥
तथा विष्णुः । अपुत्त्रस्य धनं पत्न्यभिगामि तदभावे दुहितृगामि । इत्यादि । तेन प्रपौत्रपर्य्यन्तानामभावे पत्नी धनाधिकारिणी । यथा कात्यायनः ।
"भर्त्तृदायं मृते पत्यौ विन्यसेत् स्त्री यथेष्टतः ।
विद्यमाने तु संरक्षेत् क्षपयेत् तत्कुलेऽन्यथा ॥
अपुत्त्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता ।
भुञ्जीतामरणात् क्षान्ता दायादा ऊर्द्ध्वमाप्नुयुः" ॥
यथेष्टत इति धर्म्मार्थं । तथा च व्यासः ।
"लोकान्तरस्थं भर्त्तारमात्मानञ्च वरानने ।
तारयत्युभयं नारी नित्यं धर्म्मपरायणा" ॥
मदनपारिजातधृता स्मृतिः ।
"यद्यदिष्टतमं लोके यद्यत् पत्युः समीहितं ।
तत्तद्गुणवते देयं पतिप्रीणनकाम्यया" ॥
भर्त्तुः शयनं पालयन्ती नान्यगामिनी । अतएव हरिवंशीयपुण्यकव्रतोपाख्याने ।
"दानोपवासपुण्यानि सुकृतान्यप्यरुन्धति ।
निष्फलान्यसतीनां हि पुण्यकानि तथा शुभे" ॥
तथा वृहन्मनुः,—
"अपुत्रा शयनं भर्त्तुः पालयन्ती व्रते स्थिता ।
पत्न्येव दद्यात् तत्पिण्डं कृत्स्नमंशं लभेत च" ॥
तत्पिण्डमित्यत्र तदित्यनुषज्य । तच्छब्देन भर्त्तुः परामर्शात् भर्त्तुः कृत्स्नमंशं यावदंशं हरेत् न तु वर्त्तनोचितमात्रं । इति दायतत्त्वं ॥ * ॥ अस्याः पतिश्राद्धाधिकारो यथा । पुत्रपौत्रप्रपौत्राभावे पत्नी । तथा च शङ्खः ।
"पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया ।
तदभावे तु पत्नी स्यात् तदभावे सहोदरः ॥
भार्य्यापिण्डं पतिर्दद्यात् भर्त्रे भार्य्या तथैव च ।
श्वश्र्वादेश्च स्नुषा चैव तदभावे द्विजोत्तमः" ॥
इत्यादि ॥
"अपुत्रा स्त्री यथा पुत्रः पुत्रवत्यपि भर्त्तरि ।
पिण्डं दद्यात् जलञ्चैव जलमात्रन्तु पुत्रिणी" ॥
इति निर्म्मूलं समूलत्वेऽपि बालदेशान्तरितपुत्रसद्भावविषयमिति श्राद्धविवेकप्रभृतयः । इति ॥ * ॥ अस्या भर्त्रादितर्पणाधिकारो यथा स्मृतिः ।
"तर्पणं प्रत्यहं कार्य्यं भर्त्तुः कुशतिलोदकैः ।
तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्ब्बकं" ॥
एतत्तु तर्पणं पुत्रपौत्राद्यभावविषयमिति मदनपारिजातः । इति ॥ * ॥ मृतायास्तस्या आद्यश्राद्धादि पञ्चदशश्राद्धं कर्त्तव्यं न तु सपिण्डनं । यथा । अत्र सपत्नीपुत्रस्य पुत्रत्वातिदेशात् तत्सत्वेऽपि स्त्रीणां सपिण्डनं मैथिलैरुक्तं तन्न ।
"पुत्रेणैव तु कर्त्तव्यं सपिण्डीकरणं स्त्रियाः ।
पुत्त्रकस्य पुनस्त्वन्ये भ्रातृपुत्रादयोऽपि ये" ॥
इति लघुहारीतवचने एवकारेण अतिदिष्टपुत्रनिषेधात् । पुत्रेणेति तत्सत्त्वमात्रविवक्षितं ।
"सपिण्डीकरणं तासां पुत्राभावे न विद्यते" ।
इति मार्कण्डेयपुराणैकवाक्यत्वात् ।
"यानि पञ्चदशाद्यानि अपुत्रस्येतराणि च ।
एकस्यैव तु दातव्यमपुत्रायाश्च योषितः" ॥
इति छन्दोगपरिशिष्टेन आद्यपञ्चदशश्राद्धैः प्रेतत्वपरीहारोक्तत्वाच्च । एतत्पत्युरभावे द्रष्टव्यं । ततश्च शिशौ पुत्रे अन्येनापि सपिण्ड्यते । एवं पतिसत्वेऽपि । अतएव मैथिलैरवीरायाः सपिण्डनं नास्तीत्युक्तं । इति च शुद्धितत्त्वं ॥

अवेद्यः, पुं, (विद + ण्यत् । ततो, न वेद्यः नञ्समासः ।) गोवत्सकः । इति शब्दचन्द्रिका ॥ वाकुर इतिभाषा । अज्ञेये त्रि ॥ (अविवाह्यः । यथा,—
"व्यभिचारेण वर्णानामवेद्यावेदनेन च ।
स्वकर्म्मणाञ्च त्यागेन जायन्ते वर्णसङ्कराः" ॥
इति मनुः ।)

अवेलः, पुं, (नास्ति वेला यस्य सः ।) अपलापः । अपह्नवः । इति मेदिनी ॥

अवेला, स्त्री, पूगचर्ब्बितं । इति मेदिनी ॥ चिवान गुया इति भाषा । अपराह्णः । इति लोकप्रसिद्धं । वेलाशून्ये त्रि ॥

अवेक्षणं, क्ली, (अव + ईक्ष + ल्युट् ।) अवेक्षा ॥ दर्शनं । यथा । "कृताकृतावेक्षणवत् स्वयं तत्कुशोपवेशनस्य कर्त्तव्यत्वात्" । इति संस्कारतत्त्वं । (तथाच ।
"दूरादवेक्षणं हासः संप्रश्ने सादरो भृशम् ।
परोक्षेऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु" ॥
इति हितोपदेशे ॥ अवधानम् । प्रतिजागरः । अनुसन्धानम् । यथा,—
"निगृह्य शोकं स्वयमेव धीमान
वर्णाश्रमावेक्षणजागरूकः ।"
इति रघुवंशे ॥)

अवेक्षा, स्त्री, (अव + ईक्ष + अ + ततष्टाप् ।) प्रत्यवेक्षणं । प्रत्यक्षवृष्टिः । तत्पर्य्यायः । प्रतिजागरः २ । इत्यमरः । (अवधानम् । अनुसन्धानम् । यथा,—
"अलब्धमिच्छेद्दण्डेन लब्धं रक्षेदवेक्षया ।
रक्षितं वर्द्धयेत् वृद्ध्या वृद्धं दानेन निक्षिपेत्" ॥
इति मनुः ।
("यदि रामस्य नावेक्षा त्वयि स्यान्मातृवत्तदा" ।
इति रामायणे ।)

अवेक्षितं, त्रि, (अव + ईक्ष + क्त ।) दृष्टं । यथा मनुः ।
"केशकीटावपन्नञ्च पदा स्पृष्टञ्च कामतः ।
भ्रूणघ्नावेक्षितञ्चैव संस्पृष्टञ्चाप्युदक्यया" ॥
इत्याह्निकाचारतत्त्वम् ॥ (कृतावधानः । यथा, रघुवंशे । "स कदाचिदवेक्षितप्रजः" ।)

अवैधं, त्रि, (न वैधं विधित आगतं । नञ्तत्पुरुषः ।) विध्यविषयः । विधिविवर्ज्जितं । विधिप्राप्तभिन्नं ॥ ("अवैधं पञ्चमं कुर्व्वन् राज्ञो दण्डेन शुध्यति" । इति स्मृतिः ॥)

अवोदं, त्रि, (अव + उन्द + घञ् ।) आर्द्रं । इति जटाधरः ॥

अवोधः, त्रि, (नास्ति वोधो ज्ञानं यस्य ।) निर्ब्बोधः । अज्ञानः ।

अवोक्षणं, क्ली, (अव + उक्ष + ल्युट् ।) प्रोक्षणविशेषः । नुजहस्तेन जलक्षेपणं । यथा हारीतः ।